# ॥ શ્રીમદ્રાધાદેવ્યા નામ્નામષ્ટાદશશતી ॥

.. 1800 names of Radha ..

sanskritdocuments.org

August 20, 2017

# .. 1800 names of Radha ..

## ॥ શ્રીમદ્રાધાદેવ્યા નામ્નામષ્ટાદશશતી ॥

## Sanskrit Document Information

Text title : rAdhAnAmnAmaShTAdashashatI

File name : rAdhAnAmnAmaShTAdashashatI.itx

Category : devii, radha

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran psaeaswaran at gmail

Description-comments : 1800 names for Radha from Krishnayamala mahAtantra

Source : shrIkriShNayAmale mahAtantre chaturvisho.adhyAyaH

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : November 6, 2014

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીમદ્રાધાદેવ્યા નામ્નામષ્ટાદશશતી ॥

(શ્રીકૃષ્ણયામલે મહાતન્ત્રે)
ચતુર્વિંશોઽધ્યાયઃ
બ્રાહ્મણ ઉવાચ
તતઃ સા ત્વરયા વૃન્દા દાસી કૃષ્ણસ્ય યોગિની ।
સમ્મુખસ્થા મહાદેવ્યા ગૃહીત્વા કરપઙ્કજમ્ ।
અપૃચ્છન્મધુરાલાપા તન્નામ ચરિતાનિ ચ ॥ ૧॥

વૃન્દા ઉવાચ
કિં તે નામ મહાદેવિ તન્મે કથય સુવ્રતે ।
મયા ત્વં કૃત્યયાવિષ્ટા લક્ષ્યસે મન્દગામિનિ ॥ ૨॥

શ્રુતમસ્તિ મયા કિઞ્ચિત્તદાકર્ણય સુવ્રતે ।
પરબ્રહ્મસ્વરૂપસ્ય કૃષ્ણસ્યાઽદ્ભુતરૂપિણઃ ॥ ૩॥

દેહાદ્વિનિર્ગતા પૂર્વં રાધિકા સકલાધિકા ।
તાં દૃષ્ટ્વા રૂપિણીં દેવીં સ્વયં કૃષ્ણો મુમોહ સઃ ॥ ૪॥

તતસ્તુષ્ટાવ વિકલો રાધા રાધેતિ જલ્પકઃ ।
તામેવ નીલરાજીવલોચનીં શોકમોચનીમ્ ॥ ૫॥

તતઃ સા ચ મહાદેવી ભુવનેશ્યાઽવરોધિતા ।
કૃષ્ણદેહોદ્ભવાઽપ્યદ્ય રતિભીતાઽદ્રવત્ ક્ષણાત્ ॥ ૬॥

હસ્તપ્રાપ્તાં ચ તાં દેવીં ન સ જગ્રાહ કેશવઃ ।
પ્રેમભઙ્ગભયાત્ સાઽપિ તતશ્ચાન્તર્દધે ક્ષણાત્ ॥ ૭॥

અન્તર્હિતાયાં રાધાયાં તત્કામાસક્તચેતનઃ ।
ચિન્તયામાસ વિશ્વાત્મા કથં મદ્વશગા ભવેત્ ॥ ૮॥

અપૂર્વરૂપસમ્પન્ના નવયૌવનગર્વિણી ।
તત્ર ચિન્તયતસ્તસ્ય કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૯॥

દેહાદાવિર્બભૂવાઽસૌ પરબ્રહ્મસ્વરૂપિણી ।
સમસ્તલોકજનની શ્રીમત્ત્રિપુરસુન્દરી ॥ ૧૦॥

યથા કૃષ્ણે ન ભેદોઽસ્તિ પરમાનન્દરૂપિણી ।

બહુરૂપા ચ સા દેવી તતો જાતાઃ સહસ્રશઃ ॥ ૧૧॥

અનઙ્ગકુસુમાદ્યાશ્ચ નિત્યલીલા મહાબલાઃ ।
નાનારૂપધરાઃ સર્વા નાનાશક્તિસમન્વિતાઃ ॥ ૧૨॥

અન્વેષણાય રાધાયાઃ પ્રેષિતા વિશ્વરૂપયા ।
રાધયા ચાપિ તાઃ સર્વા નિર્જિતા નિજમાયયા ॥ ૧૩॥

તચ્છ્રુત્વા ત્રિપુરાદેવી યોગિની ત્રિપુરાતની ।
ચકાર કર્મ તદ્દિવ્યં મન્ત્રમુદ્રાસમન્વિતમ્ ॥ ૧૪॥

સંક્ષોભણં દ્રાવણં ચ વશ્યાકર્ષણમાદનમ્ ।
ત્રિખણ્ડાદ્યા મુદ્રિકાશ્ચ વશ્યકર્મકુતૂહલાઃ ॥ ૧૫॥

યાભિર્વિરચિતાભિશ્ચ કા સ્ત્રી ન સ્યાદ્વશઙ્ગતા ।
માયયા મોહિતા યાશ્ચ ઉન્માદ્યન્ત્યો મનસ્વિનિ ॥ ૧૬॥

ન જાને કીદૃશી તાસાં ગતિર્ભવતિ શોભને ।
ત્રિપુરા ત્રિજગદ્ધાત્રી સાક્ષાદ્યા ભગવત્તનુઃ ॥ ૧૭॥

તયા વિરચિતા માયા ન કસ્યા વા હરેન્મનઃ ।
ન જાને કાસિ દેવી ત્વં કિં તે નામ પ્રકાશ્યતામ્ ॥ ૧૮॥

નવલાવણ્યવશ્યાભિઃ સમાપ્લાવિતવિગ્રહાઃ ।
ન ક્વાપિ કાપિ મે દૃષ્ટા સૃષ્ટાવિહ વિહારિણી ॥ ૧૯॥

બ્રાહ્મણ ઉવાચ
ઇત્યુક્ત્વા સા મહાદેવી કૃષ્ણદેવસ્ય વલ્લભા ।
વાણીં સુમધુરાં કાન્તામકરોદતિથિં મુખે ॥ ૨૦॥

શ્રીરાધિકા ઉવાચ
ન જાનામિ કુતો જાતા કસ્માદત્ર સમાગતા ।
કિં મે નામ ન જાનામિ સ્વભાવચપલાઽસ્મ્યહમ્ ॥ ૨૧॥

એકં સ્મરામિ પુરુષં શ્યામલં પુરુષાકૃતિમ્ ।
તત્કટાક્ષબાણભિન્નહૃદયા હૃદયામ્બુજે ॥ ૨૨॥

રિરંસુરપિ તં દૂરે ભયાત્ પ્રથમસઙ્ગમે ।
દૈવાદહં ગતા દૂરે નીપમૂલાદિતિ સ્મરે ॥ ૨૩॥

બ્રાહ્મણ ઉવાચ
તતો વૃન્દા ભગવતી ભૂયઃ પ્રોવાચ કામિની ।
તામેવ રાધિકાં દેવીં પ્રણયાવિષ્ટમાનસા ॥ ૨૪॥

વૃન્દા ઉવાચ
કથયસ્વ મહેશાનિ નામ કિં તે સુખાવહે ।
રૂપં દૃષ્ટ્વા મોહિતાયૈ મહ્યં શુશ્રૂષવે પરમ્ ॥ ૨૫॥

રૂપમીદૃઙ્નામ કીદૃક્ સુધાસહચરં ભવેત્ ।
ઇતિ વ્યાકુલિતાયા મે સત્યમાન્દોલિતં મનઃ ॥ ૨૬॥

કરુણાકરુણાપૂર્ણમરુણાયતલોચને ।
યદ્યસ્તિ કુરુ ચેતસ્ત્વં મમ શોકવિમોચને ॥ ૨૭॥

શ્રીરાધિકા ઉવાચ
શૃણુ તે કથયિષ્યામિ વૃન્દે વૃન્દારવન્દિતે ।
અષ્ટાદશશતીં નામ્નાં વેદાગમસુગોપિતામ્ ॥ ૨૮॥

પવિત્રાં પરમાં પુણ્યાં પાપસંહારકારિણીમ્ ।
શ્રીકૃષ્ણવિરહાક્રાન્તમનસો યદિ નો સુખમ્ ॥ ૨૯॥

તથાપિ તવ સૌભાગ્યાન્મુખે વાણીં યુનજ્મ્યહમ્ ।
યત્તે પ્રવર્ત્તયિષ્યામિ પ્રવર્ત્ત્યં ન કદાચન ।
કેભ્યોઽપિ પ્રાણતુલ્યેભ્યો ભક્તેભ્યોઽપિ વિશેષતઃ ॥ ૩૦॥

અસ્યાઽષ્ટાદશશતીનામસ્તોત્રસ્ય નારદઋષિરનુષ્ટુપછન્દઃ
શ્રીકૃષ્ણાઽભિન્ના રાધારસમયીશક્તિર્દેવતા પુરુષસ્ય
પુરુષાર્થચતુષ્ટય-
સાધને શ્રીરાધાનામ્નામષ્ટાદશશતીપાઠે વિનિયોગઃ ।

ૐ રાધા પરમા શક્તિઃ શ્રીકૃષ્ણપ્રાણવલ્લભા ।
નિત્યા રસમયી શુદ્ધા પ્રબુદ્ધા બુદ્ધરૂપિણી ॥ ૩૧॥

કમલા કમલાસ્યા ચ કમલાસનવન્દિતા ।
કમલાસના કામિની ચ કાન્તા કાન્તમનોહરા ॥ ૩૨॥

કાન્તિમત્યનુરાગાઢ્યા કામકેલિવિલાસિની ।
વૃન્દારણ્યેશ્વરી વૃન્દા વૃન્દારકમનોરમા ॥ ૩૩॥

વિશ્વેષાં જનની વિશ્વા વિશ્વપાલનકારિણી ।
વિશ્વાધારા વિશ્વરૂપા વિશ્વસૃષ્ટિવિકાસિની ॥ ૩૪॥

વિશ્વેશ્વરી વિશ્વમાયા વિશ્વસંહારચારિણી ।
અમૃતા મોક્ષદા મોક્ષા મોક્ષલક્ષ્મીઃ સુલક્ષણા ॥ ૩૫॥

નિત્યં વિલાસરસિકા નિત્યં કૌતુકલમ્પટા ।
ગોપી રાજ્ઞી શશિમુખી ખઞ્જનાક્ષી ચ ખઞ્જના ॥ ૩૬॥

ક્રીડાનિકુઞ્જનિલયા કદમ્બતરુવાસિની ।
અભક્તોત્સારણકરી સદા પ્રણતવત્સલા ૩૭॥

જગન્મોહા મોહરૂપા ગજેન્દ્રમૃદુગામિની ।
નિતમ્બિની કામદેવજયજઙ્ગમદેવતા ॥ ૩૮॥

શિવદા વિપદુદ્ધારકારિણી વિજયપ્રદા ।
વિજયા ભામિની દેવી શ્રીમતી રતિલાલસા ॥ ૩૯॥

મદોન્મત્તા માદિની ચ દીપ્તા ત્રૈલોક્યસુન્દરી ।
વૃષભાનુસુતા દુર્ગા દુર્ગોત્તારણકારિણી ॥ ૪૦॥

શ્રીવૃન્દાવનચન્દ્રાક્ષિચકોરવરચન્દ્રિકા ।
લાવણ્યવશ્યા સ્નાતાઙ્ગી પૂર્ણામૃતરસોદયા ॥ ૪૧॥

અનન્તાનન્તચરિતાઽનન્તવિક્રમચાતુરી ।
અરૂપા અધિકાકારા અમિતા અહિતા હિતા ॥ ૪૨॥

અલીકહીના અધ્યાસ્યા અરિષ્ટગણભઞ્જની ।
અરિક્તા અધૃતાશક્તા અત્યુજ્જ્વલસમુજ્જ્વલા ॥ ૪૩॥

અત્યદ્ભુતા અવિકૃતિરવિચારવિવર્જિતા ।
અવચોગોચરા વ્યક્તિરમનો વર્ત્મગામિની ॥ ૪૪॥

અનુચ્છ્વસન્માનસા ચ અતિકાન્તિકલાપિની ।
અજન્મા કર્મસુકૃતા અમલા અતિસુન્દરી ॥ ૪૫॥

અભિરામાઽભિચલિતાપ્યભિસારવિહારિણી ।
અતીવરતિસઞ્ચારિમાનસા ચાતિકામુકી ॥ ૪૬॥

અનઙ્ગરઙ્ગચતુરા ચાઙ્ગસઙ્ગતચન્દના ।
અપાઙ્ગભઙ્ગસઞ્ચારા અતિથિપ્રિયસેવિની ॥ ૪૭॥

અમરાધિતાઙ્ઘ્રિઅબ્જા અલિકા કલિકાકુલા ।
અચિન્ત્યરૂપચરિતા અધિકાનન્દશાલિની ॥ ૪૮॥

અમન્દરસસમ્પન્ના અકલા ચાકુલા તથા ।
અકાલા ચાકૃતિરતાઽપ્યચલા ચલસન્નિભા ॥ ૪૯॥

અમન્દા અરુણાક્ષી ચ અરુણારુણિમાધરા ।
અપરાધભઞ્જિની ચ અખલા ચાબલા તથા ॥ ૫૦॥

અગલન્તી છલાઢ્યા ચ અમ્બુદાગમહર્ષિતા ।
અમ્બરાવીતસર્વાઙ્ગી અમ્બુરાશિનિવાસિની ॥ ૫૧॥

અતલાઘાતિની ચાપિ અનિલાનલરૂપિણી ।
અફલાઢ્યાપ્યભીતા ચ અમૂલાપ્યયમાદરા ॥ ૫૨॥

અરવિન્દેક્ષણાઽલાસ્યાઽપ્યબોધા ચાહૃદર્પિતા ।
અક્ષમાલાધરા ચાક્ષકુન્તકાપ્યક્ષણેક્ષણા ॥ ૫૩॥

અકામાઽકાલમિલિતા અકાન્તાઽગામિની તથા ।
અચારિકા જાલગતા અતાનાઽતાન્તરૂપિણી ॥ ૫૪॥

અદાન્તાઽધારિણી ચૈવ અલાસ્યાઽપાલિતા તથા ।
અવારિતાપ્યભાવ્યા ચ અમાલ્યા માર્દ્વાઽપરા ॥ ૫૫॥

આકલ્પાકલિતા કલ્યા ચાક્વણન્મણિનૂપુરા ।
આકમ્રા કમિતા કમ્રા ચાકુઞ્ચિતશિરોરુહા ॥ ૫૬॥

આખેલમાના ખેલા ચ આખેટકવિહારિણી ।
આલસ્યેન વિહીના ચ આલયા લાસ્યકારિણી ॥ ૫૭॥

આગમોક્તાદ્ઽપ્યગણિતા આગમે ગોપિતા ગતા ।
આઘૃણા ચઞ્ચલાઽભ્યર્ચ્યા આજ્જ્વલજ્વલનોજ્જ્વલા ॥૫૮॥

આતન્વતી રતિકથામાદરોદારભાવિતા ।
આનતાનતિસુપ્રીતા ચાપન્નૈરાપદિ સ્મૃતા ॥ ૫૯॥

આફલિતાવૃતા વીતા ભાસયન્ત્યભયા તથા ।

આમૂલરસસંસ્નિગ્ધહૃદયાઽઽમયવર્જિતા ॥ ૬૦॥

આયતા રતિશીલા ચ આલીઢા હસિતાનના ।
આબુદ્ધાપ્યાશ્રિતાઽખિન્ના હારરૂપા ચ જીવિનામ્ ॥ ૬૧॥

આક્ષોદા ક્ષીણમધ્યા ચ આક્ષાલનકરી તથા ।
ઇન્દીવરવરામોદા ઇન્દુકોટિસુશીતલા ॥ ૬૨॥

ઇચ્છામયીષ્ટા શિષ્ટાનામિન્દીવરવનપ્રિયા ।
ઇનસેવનસન્તુષ્ટા ઇકાસ્યેભા મદાગમા ॥ ૬૩॥

ઈશ્વરી ઈશવશગા ચેક્ષણાહ્લાદકારિણી ।
ઈહમાના ઈતિહીના ઈડિતા સર્વદૈવતૈઃ ॥ ૬૪॥

ઉમા ઉચિતકર્ત્રી ચ ઉક્તિપ્રત્યુક્તિકારિણી ।
ઉન્મદાઽપ્યુષિતોલ્લાસા ચોચ્ચૈસ્તેજોભિરુજ્જ્વલા ॥ ૬૫॥

ઉગ્રા ચોગ્રપ્રભા ઉલ્કાપ્યુક્ષવાહનસેવિતા ।
ઉચ્ચસ્વરાઽપ્યુદીર્ણા ચ ઉન્નીતોન્વયશાલિની ॥ ૬૬॥

ઉચ્ચાર્યમાણચરિતા ચોદ્ધતોદ્ધારકારિણી ।
ઉપપન્નાઽપ્યુન્મનાશ્ચ ઉપપાતકપાતિની ॥ ૬૭॥

ઉદારાઽપ્યુન્નસોપાયાઽપ્યૂરીકૃતજગત્ત્રયા ।
ઉલ્લલન્તી તથોલ્લોલાઽપ્યુચ્છ્રિતોચ્છ્રાયકારિણી ॥૬૮॥

ઉછ્વાસાઽપ્યુચ્છ્વસદ્વક્ત્રા ઉચ્છ્વાસનવિવર્જિતા ।
ઉષા ઉષઃકાલગતા ઉષસિપ્રતિચિન્તિતા ॥ ૬૯॥

ઉત્સાહવર્ધનકરી ઉત્સહન્તી પરાં વ્યથામ્ ।
ઉત્સેધોત્સેકકલિતા ઉત્સારિતવિદૂષણા ॥ ૭૦॥

ઊર્ધ્વોર્ધ્વગમની ઋક્ષા ઋક્ષવૃન્દનિષેવિતા ।
ઋક્ષવ્યૂહાભયઙ્કારી ઋભુક્ષા ઋક્ષરૂપિણી ॥ ૭૧॥

એકાકિની ત્વેધમાના એણાક્ષી એકસેવિતા ।
ઐઙ્કારરૂપિણી ઐક્યશાલિની ઐચ્છિકી તથા ॥ ૭૨॥

ઐશ્વર્યેણ વિનાર્ચ્યા ચ ઐન્દ્રિયા ચૈન્દ્રદાયિની ।
ઓકઃસ્વરૂપિણી ઓઘા ઓઘતારણકારિણી ॥ ૭૩॥

ઓજસ્વિની ઔચિતી ચ ઔદરિક્યૌર્દ્ધિકી તથા ।
કાલિકા કલિકા કીલા કીલાલાકુલનિગ્રહા ॥ ૭૪॥

કુલીના કુલધર્માઢ્યા કુચકુટ્ટલકુટ્ટિતા ।
કૃતા કૃતમયી કૃત્યા હીનાકૃતિનિષેવિતા ॥ ૭૫॥

કેલિલોલા કેલિરૂપા કૌલિકી કૌલરૂપિણી ।
કૌલાચારપરા કૌલૈઃસેવિતા કૌલધર્મિભિઃ ॥ ૭૬॥

કાઞ્ચનાઙ્ગી કણ્ટકિની કણ્ટકેન વિવર્જિતા ।
કુત્સાવિહીના કન્દર્પદર્પસંહારકારિણી ॥ ૭૭॥

કલિન્દકન્યા કૂલસ્થા કાલિન્દી કલનિઃસ્વના ।
કાકી કઙ્કુતિકા કઙ્કુરૂપિણી ચૈવ કિઙ્કુરી ॥ ૭૮॥

કાચા કાચમયી ચૈવ કચ્છપી કજ્જલોજ્જ્વલા ।
કટકર્ત્રી કટિપટી કટન્દીનિરતા કટા ॥ ૭૯॥

કઠોરા કઠિનવ્યક્તા કઠિના કઠિનસ્તની ।
કડારા કાણ્ડસમ્પૂર્ણા કણ્ડૂઃ કણ્ડૂતિકારિણી ॥ ૮૦॥

કુણ્ડા કુણ્ડલિની કુણ્ડરૂપિણી કુણ્ડસંસ્થિતા ।
કુણ્ડિના કુણ્ડિનસ્થા ચ કણ્ડોલસ્થિતિકારિણી ॥ ૮૧॥

કાતરા ક્વથિતા ક્વાથા કનકાચલવાસિની ।
કાનની કાનનમયી કાનનેન સ્તુતા કદા ॥ ૮૨॥

કાધારા કૃપણા કૂપા કૂપશોષણકારિણી ।
કફપ્રહારિણી ચૈવ કૈવલ્યમોક્ષદાયિની ॥ ૮૩ ।૧
કામાકુલા કૂલહીના કર્મકાર્મણકારિણી ।
કામદીમા કારરૂપા કલાઢ્યા કાશિકામયી ॥ ૮૪॥

કાશીશ્વરપ્રકાશા ચ કૌશિકી કોશરૂપિણી ।
કશા કશાતાડિની ચ કેશિની કેશિસૂદની ॥ ૮૫॥

કાષ્ઠા કાષ્ઠિની કુષ્ઠનાશિની કુશજનકરી ।
કુશેશયા કૃશાઙ્ગી ચ કીશકેશ્વરસેવિતા ॥ ૮૬॥

કુશલા કુશલાઢ્યા ચ કુશલા કલિકા તથા ।
કાષાયવસના કાષ્ઠા કાષ્ઠિની કુષ્ઠનાશિની ॥૮૭॥

કૂર્મજલકરી કંસધ્વસિની કસૃતિક્ષમા ।
કાહારકારિણી કક્ષા કક્ષાકોટિવિહારિણી ॥ ૮૮॥

કક્ષરૂપા કક્ષમયી કૌક્ષેયકકરી તથા ।
કુક્ષિસંસ્થાપિતા ચૈવ કુક્ષતિઃ કુક્ષમાકરી ॥ ૮૯॥

ચક્રપાણિશ્ચ ચકિતા ચક્રાઢ્યા ચક્રવર્તિની ।
ચામીકરાકારગૌરી ચમૂરુરમણીક્ષણા ॥ ૯૦॥

ચઞ્ચલા ચિઞ્ચિનાથેષ્ટા ચઞ્ચદઙ્ગી ચ ચિઞ્ચિકા ।
ચટકા ચટકપ્રીતા ચણ્ડિકા ચણ્ડવિક્રમા ॥ ૯૧॥

ચિત્તેશા ચાતકી ચન્દ્રા ચન્દ્રિકા ચન્દ્રરૂપિણી ।
ચીનાચારપરા ચૈવ ચીનદેશભવા તથા ॥ ૯૨॥

ચપલા ચમ્પકામોદા ચમ્પકાઙ્ગી તથૈવ ચ ।
ચયરૂપા ચયાકારા ચારુરૂપા ચરાચરા ॥ ૯૩॥

ચરિત્રચારિણી ચર્વ્યમાનાસુરનરાધિપા ।
ચતુશ્ચરિધરા ચીરા ચિરચારણચારિતા ॥ ૯૪॥

ચલાચલપ્રિયા ચૈવ ચલદ્વિન્દિમનોહરા ।
ચાષરૂપા ચૂષ્યરસા ચષકાસ્યતપાયિની ॥ ૯૫॥

ચક્ષુર્લક્ષણયુક્તા ચ ચરમાડચરમાડચલા ।
ટીકા ટઙ્કારિણી ચૈવ ટલણ્ટલકરી તથા ॥ ૯૬॥

તિક્તા ચૈવ તથા તઙ્કા તઙ્કિની તઙ્કવર્જિતા ।
તિગ્મા તકારસન્તુષ્ટા તિગ્મવહ્નિપ્રિયા તથા ।૧ ૯૭॥

તઙ્કની તઙ્કમહિમા તચ્છ્રીસ્તાચ્છીલ્યશાલિની ।
તુચ્છહીના તેજિતા ચ તર્જિતા તજ્જયાત્મિકા ॥ ૯૮॥

તટિની તટરૂપા ચ તડિત્તાડનકારિણી ।
તડાગનિલયા તાડ્યા તડિત્વત્પ્રીતિદાયિની ॥ ૯૯॥

તાણ્ડવા તાણ્ડવપ્રીતા તણ્ડા તાણ્ડવિતાનના ।

તૂણીરા તૂણકુશલા તુણ્ડિની તુણ્ડભૂષણા ॥ ૧૦૦॥

તતાતતિકરી તાનપ્રિયા તિત્તિરિનિઃસ્વના ।
તોત્રા તોત્રકરા ચૈવ તત્સત્તત્સન્નિવેશિતા ॥ ૧૦૧॥

તતિની તડિની ચૈવ તથાસ્ત્વિતિવરપ્રદા ।
તથાગતાગતાભિજ્ઞા તથ્યવાણી તથૈવ ચ ॥ ૧૦૨॥

તથ્યાતથ્યવતા ચૈવ તિથિસ્તિથિપતિપ્રિયા ।
તદારાધ્યતનુસ્તન્વી તનુરૂપા તનીયસી ॥ ૧૦૩॥

તાનિની તાનરસિકા તપસ્યા તપસારતા ।
તપસ્વિની તાપહીના તાપિની તાપસપ્રિયા' ॥ ૧૦૪॥

તૃપ્તા તેમનસુપ્રીતા તેમના તામ્યતીતમા ।
તાપિની તારિણી તારા ત્રિનેત્રા ત્રિશરીરિણી ॥ ૧૦૫॥

ત્રયી ત્રાણકરી ત્રેતા ત્રેતાયુગસમુત્થિતા ।
તરિસ્તરણિસન્તુષ્ટા તરુણી તરુરૂપિણી ॥ ૧૦૬॥

તરુણાનન્દિની તીરરસિકા તીરસંસ્થિતા ।
તલા તલ્લયમાપન્ના તાનોત્સવપરાયણા ॥ ૧૦૭॥

તાલાઙ્કુરસિકા તાલપ્રિયા તિલકિની તિલા ।
તિલોત્તમા તુલાહીના તુલિતા તૃણકારિણી ॥ ૧૦૮॥

તુષિની તુષહીના ચ તુષ્ટિસ્તુષ્ટમનાસ્તથા ।
તૃષ્ણા તૃષ્ણાવર્જિતા ચ તોષિણી તોષકારિણી ॥ ૧૦૯॥

તક્ષિણી તક્ષરૂપા ચ તક્ષકાદિનિષેવિતા ।
તીક્ષ્ણા તીક્ષ્ણપ્રભા પાકા પાકસમ્પાદિની તથા ॥ ૧૧૦॥

પિકસ્વરા પક્ષિરતા પક્ષિરાજનિષેવિતા ।
પક્ષવ્રતપરા ચૈવ પક્ષિણી પક્ષરૂપિણી ॥ ૧૧૧॥

પૂગ પૂગરતા પઙ્કા પઙ્કાકુલસુદુર્લભા ।
પચિની પાચિની પૃચ્છા પૃચ્છાકુશલકારિણી ॥ ૧૧૨॥

પૂજ્યા પૂજનશક્તા ચ પઞ્ચાનનનિષેવિતા ।
પઞ્ચવક્ત્રા પઞ્ચબાણમોહિની પઞ્ચસેવિતા ॥ ૧૧૩॥

પઞ્ચત્વહા પઞ્ચપાપનાશિની ચ તથૈવ ચ ।
પઞ્ચમસ્વરસન્તુષ્ટા પઞ્ચાસ્યક્ષીણમધ્યમા ॥ ૧૧૪॥

પાઞ્ચાલિકા પાઞ્ચજન્યનિનદા પિઞ્જશાલિની ।
પઞ્જરા પઞ્જરસ્થા ચ પુઞ્જિની પુઞ્જરૂપિણી ॥ ૧૧૫॥

પટીસિન્દૂરતિલકા પટશાટીસમાવૃતા ।
પાટલા પુટિની ચૈવ પેટીપોટા તથૈવ ચ ॥ ૧૧૬॥

પઠનાસક્તહૃદયા પાઠિની પીડિતાસુરા ।
પણકર્ત્રી પાણિપદ્મશોભિતા પણ્ડિતા તથા ॥ ૧૧૭ ૧।
પાણ્ડિત્યદાયિની ચૈવ પિણ્ડદા પિણ્ડતોષિતા ।
પતિતોદ્ધારકર્ત્રી ચ પાતિતાઽમિત્રસંહતિઃ ॥ ૧૧૮ ૧।
પિતૃભક્તિરતા ચૈવ પુત્રિણી પુત્રદાયિની ।
પૂતના પૂતનાશત્રુઃ પૃતના પૃતનાવતી ॥ ૧૧૯॥

પોતાધાનાધાનકર્ત્રી પોતનિસ્તારકારિણી ।
પથિપૂજ્યા પથિપ્રજ્ઞા પથિકોચ્છ્વાસકારિણી ॥ ૧૨૦॥

પાથોરુહનિવાસા ચ પૃથિવી પૃથિવીશ્વરી ।
પદા પાદપતદ્ભક્તા પિદધાના પિધાયિની ॥ ૧૨૧॥

પાનીયજસમુચ્ચેતાઃ પીનસ્તનકટિદ્વયા ।
પુનઃપુનારસાવેશા પૌનઃપુન્યવિધાયિની ॥ ૧૨૨॥

પન્થાઃ પાન્થસ્વરૂપા ચ પાન્થદુઃખવિનાશિની ।
પાપનાશી પુષ્પરતા પવનોત્સુકમાનસા ॥ ૧૨૩॥

પાવકોજ્જ્વલતેજાશ્ચ પિબપિબેતિવાદિની ।
પીવરા પામરા પ્રાપ્યા પમ્પાપદવિલાસિની ॥ ૧૨૪॥

પયસ્વિની પયોજાઢ્યા પાયસપ્રીતમાનસા ।
પ્રિયાલકુસુમાસક્તા પરોન્મૂલનકારિણી ॥ ૧૨૫॥

પારપ્રદા પુરાણાર્ચ્યા પૂર્વોત્થા પૂર્વસેવિતા ।
પૌર્વાપર્યકરી ચૈવ પલાયનવિવર્જિતા ॥ ૧૨૬॥

પાલની પુલકાઙ્ગી ચ પાશહસ્તા તથૈવ ચ ।
પૃશ્નિગર્ભાવતારા ચ પિણ્ડઘોરસુદુર્ધરા ॥ ૧૨૭॥

પુષ્ટદેહા પુષ્ટરૂપા પોષ્યપોષણકારિણી ।
પૌષમાસનિદાઘા ચ પાક્ષિકી પક્ષિનિઃસ્વના ॥ ૧૨૮॥

પક્ષદ્વયવિધાત્રી ચ પક્ષાન્તાર્હણતોષિતા ।
ખકૃતા ખગતિશ્ચૈવ ખગતિર્લઘુપાયિની ॥ ૧૨૯॥

ખગે ખગી ખગરુતી ખગનાગસ્વરૂપિણી ।
ખઞ્જા ખઞ્જપ્રિયા ચૈવ ખઞ્જનાક્ષી ચ ખઞ્જની ॥ ૧૩૦॥

ખટ્વારતા ચ ખટ્વાઙ્ગધારિણી ખેટકપ્રિયા ।
ખણ્ડા ખાણ્ડવદાહા ચ ખણ્ડિતા સુરયૂથપા ॥ ૧૩૧॥

ખાદન્તી ખાદ્યમાના ચ ખણ્ડહીના ચ ખેદની ।
ખનિત્રી ખનનાસક્તા ખનિરૂપા ખનીલિભા ॥ ૧૩૨॥

ખિન્ના ખરતરા ચૈવ ખરાંશુમાલિની તથા ।
ખલખલી ખારકરી ખલીનકુરુકાશ્રયા ॥ ૧૩૩॥

ખલીના ખિલહીના ચ ખિલાખિલનિષેવિતા ।
ગૌર્ગોભિઃકમિતા ચૈવ ગોખુરાર્ચનસંરતા ॥ ૧૩૪॥

ગગના ગગનાધારા ગોગતા ગોગણાર્ચિતા ।
ગોગ્રહા ગોગ્રહાહ્લાદકારિણી ચ તથૈવ ચ ॥ ૧૩૫॥

ગોધનાહ્લાદસન્તુષ્ટા ગોઘટા ઘટિતા તથા ।
ગઙ્ગા ચ ગાઙ્ગતા ચૈવ ગઞ્જની ગઞ્જનોજ્ઝિતા ॥ ૧૩૬॥

ગુઞ્જન્મધુવ્રતરુતા ગુઞ્જામાલાવિભૂષણા ।
ગણેશ્વરી ગણરતા ગણેશ્વરનિષેવિતા ॥ ૧૩૭॥

ગુણિતા ગુણપૂર્ણા ચ ગૌણા ગુણવિવર્જિતા ।
ગણ્ડા ગણ્ડવતી ચૈવ ગણ્ડકુણ્ડલમણ્ડિતા ॥ ૧૩૮॥

ગણ્ડકી ચૈવ ગાણ્ડીવધારિણી ગેન્દુકપ્રિયા ।
ગતા ગતિમતી ચૈવ ગીતા ગીતાપ્રચારિતા ॥ ૧૩૯॥

ગોતનુર્ગોતતા ગાથા ગાથાગાનપરાયણા ।

ગદિતા ગદસંહન્ત્રી ગોદાનવ્રતચારિણી ॥ ૧૪૦॥

ગોધા ગોધાઙ્ગુલિત્રા ચ ગોધાન્યધનવર્દ્ધિની ।
ગાનાસક્તમના ગન્ત્રી ગન્ધા ગન્ધવહા તથા ॥ ૧૪૧॥

ગોપી ગોપાલસક્તા ચ ગોપાલબાલપાલિતા ।
ગોપગોપાર્ચિતા ચૈવ ગોપતિપ્રણયાન્વિતા ॥ ૧૪૨॥

ગોફલા ગોફલકરી ગોવર્ધનધરી તથા ।
ગોબલા ગોબલીવર્દનર્દનોત્સવમાનસા ॥ ૧૪૩॥

ગોબાલકલિતાભૂષા ગોવિન્દપ્રેમલાલસા ।
ગોવાહનમનોજ્ઞા ચ ગોવૃતા ગોવનસ્થિતા ॥ ૧૪૪॥

ગોભારભરણાસક્તા ગોભૂતા ગોઽમૃતપ્રિયા ।
ગમિતા ગમને મન્દા ગામિની ગોમતી તથા ॥ ૧૪૫॥

ગમ્ભીરી ચૈવ ગમ્ભીરા ગયાસુરનિષૂદની ।
ગયા ગયાવાસિની ચ ગાયત્રી ચૈવ ગાયની ॥ ૧૪૬॥

ગેયા ગોયાનરસિકા ગરલા ગરલાકુલા ।
ગાનોન્મત્તમણિશ્રીકા ગિરન્તી ચ ગિરામયી ॥ ૧૪૭॥

ગીર્યમાણા ગોરસાઢ્યા ગોરસક્રયકારિણી ।
ગૌરી ગોશ્વસિતામોદા ગૃષ્ટિરૂપા તથૈવ ચ ॥ ૧૪૮॥

ગોસારણકરી ચૈવ ગોસુલક્ષણલક્ષિતા ।
ગોસર્જનકરી ચૈવ ગહના ગહનપ્રિયા ॥ ૧૪૯॥

ગાહા ગુહનિષેવ્યા ચ ગુહ્યા ચ ગૃહદેવતા ।
ગેહિની ગોક્ષમાધીરા ઘૂકા ઘૂકારુતોત્સવા ॥ ૧૫૦॥

ઘાટિતા ઘટિતા ચૈવ ઘાટાવત્યપિ ઘાટિકા ।
ઘોટકાકારકલિતા ઘણ્ટા ઘણ્ટાવિમોદિની ॥ ૧૫૧॥

ઘણ્ટાકર્ણનિષેવ્યા ચ ઘાણામૌક્તિકરાજિતા ।
ઘૃણાવતી ઘાતકરી ઘૃતામોદવિધાયિની ॥ ૧૫૨॥

ઘનાનન્દા ઘનમયી ઘનાઘનનિષેવિતા ।
ઘનાગમરકૃતરતિર્ઘર્માગમસુશીતલા ॥ ૧૫૩॥

ઘર્ષણા ધૃષ્ટરૂપા ચ ધૃષ્ટિર્ઘાસાભિલાષિણી ।
છેકાછેક રવેલમાના છગલી છાગવાહિની ॥ ૧૫૪॥

છાગવાહનસેવ્યા ચ છટાત્રૈલોક્યમોહિની ।
છત્રાછત્રમયી છત્રછાદિતા છાત્રરૂપિણી ॥ ૧૫૫॥

છદાકર્ણા છાદિની ચ છેદિની છેદવર્જિતા ।
છદરૂપા છન્નરૂપા છન્નનામ્ની તથૈવ ચ ॥ ૧૫૬॥

છિન્નમસ્તા છન્નમૂર્તિશ્છન્નપ્રચ્છન્નકારિણી ।
છન્દા છન્દમયી ચૈવ છન્દોગા છન્દસામ્પ્રભુઃ ॥ ૧૫૭॥

છાયામયી છાયિની ચ છાયાકર્ત્રી છલપ્રિયા ।
છલાછલકરી છલ્યા જગન્નાથપ્રિયાપિ ચ ॥ ૧૫૮॥

જગતામુપકર્ત્રી ચ તથા જાગરણક્ષમા ।
જઙ્ગમા જઙ્ગમેશાની તથા જઙ્ગમચારિણી ॥ ૧૫૯॥

જટાજૂટધારિણી ચ જડાજડનિપાતિની ।
જિતામિત્રા ચ જેત્રી ચ જૈત્રકર્મવિધાયિની ॥ ૧૬૦॥

જનની જનનીતિજ્ઞા જિનાચારપરાયણા ।
જપા જપ્યા જપકરી જાપિની જીવધારિણી ॥ ૧૬૧॥

જીવાપિ જીવજીવાતુર્જૈવાત્રિકમનોરમા ।
જડિની જડસુપ્રીતા જમલાર્જુનભઞ્જિની ॥ ૧૬૨॥

જેમના જેમનકરી જૈમિનિસ્તવનપ્રિયા ।
જમ્બૂલમાલિકારક્તા જમ્બૂપ્રીતા ચ જામ્બવી ॥ ૧૬૩॥

જામ્બવત્યપિ જમ્બાલા જમ્બાલકલિતાઽપિ ચ ।
જમ્બુવત્સેવિતા ચૈવ જમ્બૂનદવિભૂષણા ॥ ૧૬૪॥

જમ્બીરવિપિનાસક્તા જમ્બુકાનનવાસિની ।
જૃમ્ભાપિ જૃમ્ભમાનાસ્યા જમ્ભસૂદનવન્દિતા ॥ ૧૬૫॥

જમ્ભપ્રવૈરિણી ચૈવ જયા ચ જયિની તથા ।
જાયા જેયવિજેત્રી ચ જરામરણવર્જિતા ॥ ૧૬૬॥

જલા જલમયી ચૈવ જલેશ્વરનિષેવિતા ।
જલવાસા જાલહીના જાલક્ષેપણકારિણી ॥ ૧૬૭॥

જક્ષિણી જક્ષસેવ્યા ચ જક્ષિણીગણસેવિતા ।
જક્ષરાડભિલાષ્યા ચ ઝઙ્કારા ઝઙ્કૃતિપ્રિયા ॥ ૧૬૮॥

ઝઞ્ઝારૂપા ઝટા ચૈવ ઝિણ્ટીકુસુમપૂજિતા ।
ઝરરૂપા ઝષાકારા ઝષરાશિનિષેવિતા ॥ ૧૬૯॥

ઠં ઠં ઠનિતિશબ્દાઢ્યા ઠદ્વયા ઠઠરૂપિણી ।
ડમડ્ડમરુહસ્તા ચ ઢક્કાવાદ્યવિનોદિની ॥ ૧૭૦॥

દણ્ડા દણ્ડધરા ચૈવ દણ્ડપાણિનિષેવિતા ।
દાત્રી દૂતી દૂત્યસક્તા દૂતિસઞ્ચારકારિણી ॥ ૧૭૧॥

દાનસઞ્ચારસન્તુષ્ટા દાનદ્વિરદગામિની ।
દણ્ડિની દણ્ડધવલા દાન્તા દ્વન્દ્વવિનાશિની ॥ ૧૭૨॥

દન્દશૂકસમાકારા દવાગ્નિવીર્યસમ્ભૃતા ।
દાવસ્થિતા દવિષ્ઠા ચ દેવતાગણસેવિતા ॥ ૧૭૩॥

દેવી દેવવસુસ્નિગ્ધા દેવકી દેવકપ્રિયા ।
તથા દૈવવિધાનજ્ઞા દૈવવિદ્ભિર્નિષેવિતા ૧। ૧૭૪॥

દમરૂપા દામિની ચ દમ્ભા દમ્ભોલિવિક્રમા ।
દમ્ભા દમ્ભવતી ચૈવ દયા ચાપિ દયામયી ॥ ૧૭૫॥

દાયાઢ્યા દાયરૂપા ચ દૂયમાના સુરાધિપા ।
દેયપ્રાપ્યા દરાઢ્યા ચ દરહીના દરાવહા ॥ ૧૭૬॥

દારિણી દૂરલભ્યા ચ દલપૂર્ણા દલપ્રિયા ।
દોલાયમાનસર્વાઙ્ગી દિવ્યતેજઃપ્રકાશિની ॥ ૧૭૭ ૧।
દિવ્યા દિવિવિહારા ચ દિવારાત્રિકરી તથા ।
દશદિગ્જ્યોતિની ચૈવ દશાફલવિધાયિની ॥ ૧૭૮॥

દશાદશકલાદેશકાલોચિતપરાક્રમા ।
દિશન્તી દાશરૂપા ચ દોષલેશવિવર્જિતા ॥ ૧૭૯॥

દોષક્ષયકરી દુષ્ટદૂષણોદ્ધારકારિણી ।

દાસીપ્રિયા દાસ્યકરી દાસીગણવિરાજિતા ॥ ૧૮૦૦
દહના દહનેશા ચ દાહનિર્મૂલકારિણી ।
દહની દીહમાના ચ દિહન્નિતમ્બશાલિની ॥ ૧૮૧॥

દેહધાત્રી દૌહિકી ચ દોહિની દોહરૂપિણી ।
દક્ષા દક્ષિણદિગ્જાતા દક્ષિણા દક્ષિણપ્રિયા ॥ ૧૮૨॥

દાક્ષિણ્યનિરતા દીક્ષા દીક્ષાકૃતિપરાયણા ।
દીક્ષિતપ્રણયાવિષ્ટા દીક્ષિતાતિવશસ્થિતા ॥ ૧૮૩॥

ધિક્કારિણી ચ ધટિની ધેટીકટિસુશોભિતા ।
ધેટિની ધેટરૂપા ચ ધૃતશ્રીર્ધૌતવિગ્રહા ॥ ૧૮૪॥

ધન્યા ધનદસન્તુષ્ટા ધન્વાનોદનકારિણી ।
ધૂપિની ધૂપસમ્મોદા ધવલાઙ્ગી ચ ધાવિની ॥ ૧૮૫ ૧।
ધમિની ધામિની ધૂમ્રા ધૂમકેતુવિનાશિની ।
ધૂમયોનિકતપ્રીતિર્ધૂમ્રલોચનમર્દિની ॥ ૧૮૬॥

ધૂમા ધૌમ્યા ધૌમ્યરતા ધ્માયમાનાઽમ્બુજાપિ ચ ।
ધિયા પ્રાપ્યા ધૂયમાના ધ્યેયા ધ્યાનવિગોચરા ॥ ૧૮૭॥

ધરણી ધરણીશાની ધરણીધરધારિણી ।
ધારાધારમયી ધારાધારિણી ધીરપૂજિતા ॥ ૧૮૮॥

ધુરન્ધરા ધોરણી ચ ધૌરીણવ્રતચારિણી ।
ધૂલિધૂસરગાત્રા ચ ધૂસરા ધૂસરેક્ષણા ॥ ૧૮૯॥

ધિષણાવત્સેવિતા ચ ધિષણા ધિષણાવતી ।
ધૂક્ષન્તી નાકનિલયા નાકનાયકનાયિકા ॥ ૧૯૦॥

નિકટસ્થા ચ નૌકા ચ નૌકાસન્તારકારિણી ।
નૃકપાલમાલકણ્ઠા નિકારાન્તવિધાયિની ॥ ૧૯૧॥

નખરા નખચન્દ્રા ચ નસરેખાવિભૂષણા ।
નગગાનગજા ચૈવ નગરાજનિવાસિની ॥ ૧૯૨॥

નાગવાહનસન્તુષ્ટા નાગિની નાગસેવિતા ।
નવલા નાચલા ચૈવ નૃચાતુર્યકરી તથા ॥ ૧૯૩॥

નિચોલાઞ્ચલસંવીતા નૈચિકીગણપૂજિતા ।
નૌચલા નોચ્છલકરી નૃચ્છાદનકરી તથા ॥ ૧૯૪॥

નિજલોકશોકહરા નેજની નૌજનસ્તુતા ।
નૃજનાર્ચનસન્તુષ્ટા નૃસંહારકરી તથા ॥ ૧૯૫॥

નટિની નટરૂપા ચ નટનાટનકારિણી ।
નાટ્યલીલાવિનોદા ચ નાટિતાખિલસંમૃતિઃ ॥ ૧૯૬॥

નીજજારુતકર્ત્રી ચ નીજજાધિપવાહના ।
નતચેતોઽમ્બુજસ્થા ચ નિન્દાનન્દમયી તથા ॥ ૧૯૭॥

નૂતનાતિનૂતના ચ નેત્રત્રયવિભૂષિતા ।
નેત્રી નેત્રશોભિતાઙ્ગી નાસ્વરૂપા નદન્મુગ્વી ॥ ૧૯૮॥

નાદરૂપા નિદધતી નૌધરાધરનિશ્ચલા ।
નદસ્વરા ચૈવ તથા નાનાગુણસમન્વિતા ॥ ૧૯૯॥

નૃણામપ્રીતિહૃદયા નૌનાશિતભયાવહા ।
નન્દિની નન્દિતા ચૈવ નન્દનન્દનજીવની ॥ ૨૦૦॥

નિન્દાહીના તથા નન્દા નીપમૂલવિનાશિની ।
નૃપતિત્વપ્રદા ચૈવ નૌપતિપ્રતિસેવિતા ॥ ૨૦૧॥

નૃકુલૈકપ્રદાત્રી ચ નવનીતસુકોમલા ।
નાવનીતરસસ્નિગ્ધા નિવિડાશ્લેષકારિણી ॥ ૨૦૨॥

નીવિબન્ધાનુબન્ધા ચ નભોગમનલાલસા ।
નાભિહ્રદગભીરા ચ નિભાસદ્ભાસ્કરોજ્જ્વલા ॥ ૨૦૩॥

અપિ નૌભવનસ્થા ચ નમસ્યા નામમોહિની ।
નિમ્નનાભિસુશોભા ચ નૃમણ્ડલવિભૂષણા ॥ ૨૦૪॥

નેમિર્નેમિવતી ચૈવ નૈમિષારણ્યવાસિની ।
નિત્યરૂપા નિત્યરસા નયનાનન્દવર્ધિની ॥ ૨૦૫॥

નયધીરા નાયિકા ચ નિયતા નિયતિપ્રદા ।
નિયમાચારસઞ્ચારા નરેન્દ્રપરિસેવિતા ॥ ૨૦૬॥

નરાન્તર્યામિની ચૈવ નિરયાન્તકકારિણી ।

નારાયણી નીરવાસા નૈરન્તર્યા ચ નૌરતા ॥ ૨૦૭॥

નલસેવ્યા ચ નાનાઢ્યા તથા નીલસરસ્વતી ।
નૃલમ્બનકરી ચૈવ નૌલમ્બનકરી તથા ॥ ૨૦૮॥

નાશની નાશરહિતા નૃશીલપરિશીલના ।
નૌશાન્ધકારદલની નોષરસ્થા ચ નોષિતા ॥ ૨૦૯॥

નાસાવેષિતમુક્તા ચ નૃસજ્જનસુતોષિતા ।
નીહારાલયપુત્રી ચ નિહતિર્નિહતિક્રિયા ॥ ૨૧૦॥

નીહારાંશુસમાકારા તથા નૌહરણોદ્યતા ।
નૃક્ષયકરી તથા ચૈવ નૌક્ષાલનકરી તથા ॥ ૨૧૧॥

ફટાવતી ફણિપતિપ્રથિતા ફણદીપિતા ।
ફેનશુભ્રા ચ ફૂત્કારા ફેત્કારિણ્યપિ ફેરુતા ॥ ૨૧૨॥

ફલદાત્રી ફુલ્લરૂપા ફુલ્લસ્તબકશોભિતા ।
ફલ્ગુરૂપા ફલ્ગુવાક્યા ફલ્ગૂત્સવપરાયણા ॥ ૨૧૩॥

બકલીલા બાકલા ચ વૃકવ્યૂહવિનાશિની ।
વૃકોદરાડગ્નિરૂપા ચ બાતા વાગ્વાગુપાસિતા ॥ ૨૧૪॥

વિગતા વેગિની ચૈવ વિધાતૃભયનાશિની ।
વચનારચનાદક્ષા વાચિકપ્રાણમોહિની ॥ ૨૧૫॥

વિચારચતુરા વીચિર્વીચિહન્ત્રી તથૈવ ચ ।
વજ્રભૂષા વજ્રપાણિર્વજ્રવૈરોચની તથા ॥ ૨૧૬॥

વાજિપૃષ્ઠસમારૂઢા વિજરા બીજરૂપિણી ।
વઞ્ચકારુતસન્ધાત્રી વઞ્ચકવ્યૂહવેષ્ટિતા ॥ ૨૧૭॥

વટમૂલનિવાસા ચ વટાધિષ્ઠાનકારિણી ।
વિટજલ્પિતસુપ્રીતા વિટ્ઠલેશ્વરપૂજિતા ॥ ૨૧૮॥

વિટ્પૂજિતા ચ વડવા વાડવાગ્નિસમપ્રભા ।
વીણાવાદનસુપ્રીતા વીણા વીણાવતી તથા ॥ ૨૧૯॥

વન્દનાસક્તહૃદયા વસન્તોત્સવકાતરા ।
વાતપુત્રી ચ વિતનુધ્વજિની વીતવિદ્રવા ॥ ૨૨૦॥

વૃતકન્દર્પમિત્રા ચ વેત્રપાણિસ્તથૈવ ચ ।
વદાવદપ્રિયા ચૈવ વાદિની વિદરા તથા ॥ ૨૨૧॥

વેદરૂપા વેદવતી વૈદર્ભીવધકારિણી ।
બાધા બાધાનાશિની ચ વિધન્વા વિધુરૂપિણી ॥ ૨૨૨॥

વિધિશીલા બુધા બોધ્યા વેધઃપૂજ્યા ચ વૈધસી ।
બોધિતા બોધશીલા ચ બૌદ્ધા બૌદ્ધક્રિયાપ્રિયા ॥ ૨૨૩॥

વનસ્થિતા વાનપ્રસ્થા વિનેત્રા વૃન્તરૂપિણી ।
વન્દનપ્રીતચિત્તા ચ વન્દિતા વન્દિતપ્રિયા ॥ ૨૨૪॥

વૃન્દારવૃન્દવીતા ચ વૃન્દાવનવિલાસિની ।
બન્ધનાપન્નાશિની ચ બન્ધુજીવારુણાધરા ॥ ૨૨૫॥

વન્ધ્યાપત્યપ્રદા ચૈવ બાન્ધવાપ્રીતમાનસા ।
વપનોત્સવસંસર્પા વનિતા વિપણિસ્થિતા ॥ ૨૨૬॥

વરવરસ્રવદ્રક્તા વિવરાન્તરચારિણી ।
વિભીર્વૈભવસમ્પૂર્ણા વમિતાસુરપુઙ્ગવા ॥ ૨૨૭॥

વામા ચ વામદેવાર્ચ્યા વિભનોહૃદયસ્થિતા ।
બિમ્બાધરા વ્યયાઢ્યા ચ વૈયાસકિનિષેવિતા ॥ ૨૨૮॥

વરારોહા વારિણી ચ વિરહાનલકીલિતા ।
વીરા વીર્યયુતા ચૈવ વીરણપ્રીતિમાનસા ॥ ૨૨૯॥

વૈરિનિષ્કમ્પિની ચેવ બલસૂદનદુર્લભા ।
બલરામાભિરામા ચ બલવિક્રમકારિણી ॥ ૨૩૦॥

બાલા બિલપ્રવિષ્ટા ચ વિલમ્બકરણક્ષમા ।
વશંવદા વિશાખેશા વેશચારુવિલાસિની ॥ ૨૩૧॥

વૈશમ્પાયનપૂજ્યા ચ વષડ્ વિષવિનાશિની ।
વૃષાસુરનિહન્ત્રી ચ વૃષરક્ષણકારિણી ॥ ૨૩૨॥

વૌષડ્વસનશૂન્યા ચ વાસ્તુયાગસુતોષિતા ।
વિસિનીદલવાસા ચ વાહિની વાહિનીસ્થિરા ॥ ૨૩૩॥

વિહારકારિણી ચૈવ બૃહતી વૈહાયસી તથા ।
વક્ષોરુહયુગોત્તુઙ્ગા વિક્ષાલનકરી તથા ॥ ૨૩૪ ૦।
વૃક્ષશ્રેષ્ઠાગ્રનિલયા ભેકપ્લુતિવિનાશિની ।
ભગભાલાલઙ્કૃતા ચ ભગવત્યપિ ભાગિની ॥ ૨૩૫॥

ભાગ્યવત્તી તથા ચૈવ ભૃગુસેવનતોષિતા ।
ભોગિની ભોગદા ભોગ્યા ભઙ્ગભીતિવિનાશિની ॥ ૨૩૬॥

ભૃઙ્ગરઙ્ગસઙ્ગમા ચ ભજનસ્નિગ્ધમાનસા ।
ભાજનશ્રીવૃદ્ધિકરી ભુજાન્દોલવિલાસિની ॥ ૨૩૭॥

ભોજ્યભોજનસન્તુષ્ટા ભઞ્જની ભટદુર્ઘટા ।
ભુવનાસક્તવદના ભણ્ડમણ્ડનકારિણી ॥ ૨૩૮॥

ભાણ્ડવત્યપિ ભાણ્ડાઙ્ગી ભીતા ભૂતરાનિષેવિતા ।
ભૃતા ભૃત્યપ્રિયા ચૈવ ભૌતચેષ્ટાવિધાયિની ॥ ૨૩૯॥

ભિદાકર્ત્રી ભેદહીના ભૂપગોષ્ઠીસમર્ચિતા ।
ભાપપદપ્રદાત્રી ચ ભવેન પરિભાવિતા ॥ ૨૪૦॥

ભાવિની ભુવનપ્રીતા તથા ભામા ચ પમ્ભામિની ।
ભીમવીર્યપોષણી ચ ભૂઆંમભૂંમગુણાબૂતા ॥ ૨૪૧॥

ભૌમસ્થાનપ્રદાત્રી ચ ભૌમગ્રહસુપૂજિતા ।
ભયહીના ભવોદ્ભ્રાન્તા ભારોત્તોલનકારિણી ॥ ૨૪૨॥

ભીરુર્ભૂરિગુણોપેતસેવિતા ભેરિનિઃસ્વના ।
ભેરુણ્ડા ભૈરવી ચાપિ ભૂલમ્બનકરી તથા ॥ ૨૪૩॥

ભૃશદુરિતનિહન્ત્રી ચ ભાષિણી ભિષગર્ચિતા ।
ભીષણા ચ ભુશુણ્ડ્યસ્ત્રા ભૂષણેન વિભૂષિતા ॥ ૨૪૪॥

ભેષજાશનનીરોગા ભૈષજ્યપદદાયિની ।
ભક્ષિણી ચૈવ ભિક્ષુશ્ચ ભિક્ષાકર્મકલાપિની ॥ ૨૪૫॥

ભૂક્ષયકલાલોલા ચ તથા ભૈક્ષ્યવિધાયિની ।
ભૈક્ષાચારસુસન્તુષ્ટા મકરાકૃતિકુણ્ડલા ॥ ૨૪૬॥

મુક્તા મુક્તનિષેવ્યા ચ મુક્તાહારવિહારિણી ।

મૃકણ્ડુતનયાર્ચ્ચા ચ મૃકણ્ડપરિખણ્ડિની ॥ ૨૪૭॥

મૌક્તિકાભાસુરરદા મખકર્મસમર્હિતા ।
મેખલા કટિબન્ધા ચ મૌખર્યપરિવર્જિતા ॥ ૨૪૮॥

મૃગશિરસિ જાતા ચ મૃગચર્મોપવેશિતા ।
મૃગપત્નીલોચની ચ મુગ્ધા મુગ્ધનિષેવિતા ॥ ૨૪૯॥

મઘવદ્વિક્રમકરી મોઘીકૃતરિપુવ્રજા ।
મેઘકેશી મઙ્ગલી ચ તથા મઙ્ગલદાયિની ॥ ૨૫૦॥

મજ્જાવતી મૃજાશીલા મઞ્ચસ્થા મઞ્જુવાગપિ ।
મોટિની મઠમધ્યસ્થા મૃડાની મેઢ્રચક્રગા ॥ ૨૫૧॥

મણિમણ્ડપમધ્યસ્થા મણિરાજિવિરાજિતા ।
મણિપત્રસ્થિતા ચૈવ તથા માણવકાકૃતિઃ ॥ ૨૫૨॥

મૃણાલાભભુજાયુગ્મા મૃણાલશયનોત્સુકા ।
મણ્ડલાન્તરસંસ્થા ચ મુણ્ડમાલાસમાકુલા ॥ ૨૫૩॥

મતાભિજ્ઞા માતલીષ્ટા મિત્રસંસર્ગતોષિતા ।
મૃતસત્કારકર્ત્રી ચ મૈત્રવર્ત્મપ્રકાશિની ॥ ૨૫૪॥

મથની મદપૂર્ણા ચ માદિની મુદિતા તથા ।
મૃદિતા મેદુરા ચૈવ મોદિની મૌદિરપ્રદા' ॥ ૨૫૫॥

મધુમાધ્વીકમત્તા ચ માધવીપુષ્પસૌરભા ।
મૃધનિર્જયિની ચૈવ મનોવિષયજૃમ્ભિતા ॥ ૨૫૬॥

માનિની મીનનેત્રા ચ મુનિરાજનિષેવિતા ।
મૌનિની ચ તથા ચૈવ મન્થાનદણ્ડધારિણી ॥ ૨૫૭॥

મન્દારકુસુમાર્ચ્ચા ચ માન્દ્યવર્જનકારિણી ।
મયદાનવસંસેવ્યા માયાહીના ચ માયિની ॥ ૨૫૮॥

મયૂરનિનદાપ્રીતા મયૂરરુતકારિણી ।
મરણત્રાસહન્ત્રી ચ મારોદ્દીપનકારિણી ॥ ૨૫૯॥

મુરાગન્ધપ્રિયા ચૈવ મલલેશવિનાશિની ।
માલાશોભિતસર્વાઙ્ગા મિલન્તી મીલયન્ત્યપિ ॥ ૨૬૦॥

મૂલરૂપા મૌલિકા ચ મેધામૈશ્વર્યદાયિકા ।
મિષન્તી મૂષિકાકારા મૂષિકાંશુવરપ્રદા ॥ ૨૬૧॥

મેષાદિની મોષહીના માસવ્રતપરાયણા ।
મોહિની મક્ષિકારૂપા મેક્ષણી મોક્ષદાયિની ॥ ૨૬૨॥

યાગપ્રિયા યુગકરી યોગિનીકોટિવલ્લભા ।
યૌગિકી યાચમાના ચ યચ્છન્તી યજનક્રિયા ॥ ૨૬૩॥

યાજયન્તી તથા ચૈવ યોજનાયામવિસ્તૃતા ।
યોટની યતમાના ચ યાતનાક્ષયકારિણી ॥ ૨૬૪॥

યદુવંશક્ષયકરી યાનમઙ્ગલચારિણી ।
યોનિરૂપા યૌવનાઢ્યા યુવલોકવિલોકિતા ॥ ૨૬૫॥

યમભીતિક્ષયકરી યામિની યમુના તથા ।
યાવદ્ગુણસુસમ્પન્ના યશસ્યા ચ યશસ્વિની ॥ ૨૬૬॥

યશોદામોહિની ચૈવ યોષાકુલશિરોમણિઃ ।
રુક્મિણી રાગરસિકા રુગપેતા ચ રોગહૃત્ ॥ ૨૬૭॥

રાઘવી રાઘવપ્રીતા રઙ્કાનુગ્રહકારિણી ।
રઙ્ગદા રિઙ્ગણકરી રોચિઃસઞ્ચારકારિણી ॥ ૨૬૮॥

રુચિરા રૌચિકી ચૈવ રાજલક્ષણલક્ષિતા ।
રુજાસઞ્ચારકર્ત્રી ચ રઞ્જના રટનોત્સવા ॥ ૨૬૯॥

રણદુર્મદમત્તા ચ રતકાલવિલાસિની ।
રીતિજ્ઞા રુતઘોરા ચ રથલક્ષપુરોગતા ॥ ૨૭૦ ૧।
રદદ્વયસ્મેરયુતા રાધિતા રોધકારિણી ।
રોધોવિનાશિની ચૈવ રન્ધનાકુલવિગ્રહા ॥ ૨૭૧॥

રૂપ્યભાણ્ડા રૂપવતી રોપણી રવકૌતુકા ।
રાવિણી રેવતી રેવા તથા રૈવતકસ્થિતા ॥ ૨૭૨॥

રમા ચ રમણી ચેવ રામણીયકમયુતા ।
રોમરાજીરાજિતા ચ રમ્ભા રમ્ભાવનસ્થિતા ॥ ૨૭૩॥

રચકર્ત્રી રોષકરી રુષ્ટા રસિતકૌતુકા ।
રાસાવેશવિલાસા ચ રોહિણી રક્ષિણી તથા ॥ ૨૭૪॥

રાક્ષસેશ્વરસેવ્યા ચ રૂક્ષા લકુચવેષ્ટિતા ।
લગિતા લગ્નસઞ્ચારા ચાપિ લગ્નમયી તથા ॥ ૨૭૫॥

લઘુબુદ્ધિપ્રદા ચૈવ લઙ્કાપુરનિવાસિની ।
લૈઙ્ગવર્ત્મપ્રકાશા ચ લિઙ્ગરૂપા ચ લિઙ્ગિની ॥ ૨૭૬॥

લઙ્ઘની ચ તથા લજ્જા લજ્જાભરધરા તથા ।
લાજવિક્ષેપણી ચૈવ લાઙ્ગુલી લાઙ્ગુલાન્વિતા ॥ ૨૭૭॥

લાતા લોડનકર્ત્રી ચ લૂતાતન્તુપ્રસારિણી ।
લૂનામિત્રા ચ લપની લાપસંલાપકારિણી ॥ ૨૭૮॥

લોપામુદ્રા લાભકત્રી લોભહીના ચ લોભની ।
લોમશારાધ્યચરણા લમ્બની લમ્ભની તથા ॥ ૨૭૯॥

લયહીના લયગતા લયનાન્તરશાયિની ।
લાલામયી લલજ્જિહ્વા લાસ્યકર્ત્રી ચ લાસિકા ॥ ૨૮૦॥

લક્ષસેવ્યા ચ લાક્ષાભા લાક્ષારાગાનુરાગિણી ।
વુદ્ધિપ્રદા બુદ્ધિરતા બુદ્ધિરૂપા તથૈવ ચ ।૧ ૯૮૧॥

શક્તિઃ શાકમ્ભરી ચૈવ શિક્યનિર્માણકારિણી ।
શુકપોષણકર્ત્રી ચ શુકદેવવરપ્રદા ॥ ૨૮૨॥

શૂકરાકૃતિકર્ત્રી ચ શૂકધાન્યસુતોષિતા ।
શોકાપનોદિની ચૈવ શાખિની શિખિસત્પ્રભા ॥ ૨૮૩॥

શાઙ્કુરી શઙ્કુરા ચૈવ શઙ્ખિની શૃઙ્ગધારિણી ।
શાટીપટસમુદ્દીપ્રા શઠલોકબિભર્ત્સની ॥ ૨૮૪॥

શાઢ્યહીના તથા ચૈવ શણસૂત્રશિરોરુહા ।
શૂલપાણિઃ શોણનેત્રા શાતકુમ્ભસ્તનદ્વયી ॥ ૨૮૫॥

શિતબાણા શીતમૂર્તિઃ શોથઘ્ની શુદ્ધરૂપિણી ।
શાન્તા શાન્તિમતી ચૈવ શિઞ્જિતા સજ્જનપ્રિયા ॥ ૨૮૬॥

શપથા શાન્તહૃદયા શાપમોચનકારિણી ।

શફરીનયની ચૈવ શિફારૂઢા શવાસના ॥ ૨૮૭॥

શાવપોષ્ટ્રી શિવોપાસ્યા શિવા ચ શેવધિસ્તથા ।
શિવિકા શિવિકારૂઢા શૈવવર્ત્મપ્રદાયિની ॥ ૨૮૮॥

શોભાકરી શમવતી શામિન્યપિ ચ શેમુષી ।
શમ્પામધ્યા શમ્બરારિવારિણી શામ્બરી તથા ॥ ૨૮૯॥

શમ્ભુરૂપા શામ્ભવી ચ શમ્ભુમૂર્ધ્નિસ્થિતાપિ ચ ।
શયનોચ્છ્વસિતા ચૈવ શાયિતા શરવારિણી ॥ ૨૯૦॥

શ્રીઃ શ્રીમન્નિષેવ્યા ચ શ્રીફલાધઃસ્થિતા તથા ।
શારિણી શિવમૂર્દ્ધા ચ શિવહસ્તા તથૈવ ચ ॥ ૨૯૧ ।૧
શૂરસેવ્યા શૈવહસ્તપ્રદદા શૌરકર્મિણી ।
શલભોદ્ધારિણી ચૈવ શાલાનિર્માણકારિણી ॥ ૨૯૨॥

શિલાવૃષ્ટિકરી શીલશાલિની શૂલિની તથા ।
શૈલતુલ્યા શ્વરીના ચ શ્વાપદવ્યૂહવેષ્ટિતા ॥ ૨૯૩॥

શ્વેતાસના શ્વૈત્યવતી શ્વાતી શ્વસનકારિણી ।
શ્વાસાનિલસુગન્ધા ચ શશચર્મનિવાસિની ॥ ૨૯૪॥

શૈશવાઢ્યા શેષહીના શોષણી શાસિની તથા ।
શિક્ષાકરી સુકણ્ઠી ચ સેકકર્ત્રી સુકોમલા ॥ ૨૯૫॥

સુખપ્રદા સૌખ્યરૂપા સગરાન્વયતારિણી ।
સાગરાસ્થા ચ સુગદધ્વંસિની સદ્ગુરપ્રિયા ॥ ૨૯૬॥

સાઙ્ગોપાઙ્ગક્રિયાધ્યક્ષા સઙ્ઘસઞ્ચારકારિણી ।
સજ્જનાહ્લાદજનની સુજની સઞ્જયાર્ચિતા ॥ ૨૯૭॥

સિતપદ્મદલપ્રીતા સુતનુઃ સૂત્રરૂપિણી ।
સૃતા ચ સદરા ચૈવ સાદરા સીદદુદ્વ્યથા ॥ ૨૯૮॥

સુદયા સુદરા ચૈવ સોદરપ્રીતિકારિણી ।
સધવા ચ તથા સાધ્વી સિદ્ધા સીધુનિપાયિની ॥ ૨૯૯॥

સુધન્વા ચ તથા સેનાકોલાહલવિધાયિની ।
સૈન્યમૂર્દ્ધાસન્દલની સન્દેશહારિણી તથા ॥ ૩૦૦॥

સાન્દ્રાનન્દા ચ સિન્દૂરમણ્ડિતાલિકમણ્ડલા ।
સુન્દોપસુન્દહન્ત્રી ચ સૌન્દર્યસર્વમોહિની ॥ ૩૦૧॥

સન્ધિવિગ્રહકાર્યા ચ સન્ધાત્રી સન્ધ્યયાર્ચિતા ।
સન્ધ્યા સિન્ધુસ્વરૂપા ચ સિન્ધુમજ્જનકારિણી ॥ ૩૦૨॥

સૈન્ધવી સૈન્ધવશ્રીકા સુપદા સૂપકારિણી ।
સૌપધદાયિની ચૈવ સવૃત્તિઃ સાવરા તથા ॥ ૩૦૩॥

સુવર્ણાલઙ્કારધાત્રી સૌવર્ણપ્રભવોજ્જ્વલા ।
સભાસભ્યધિકર્ત્રી ચ સાભા ચ સુભગા તથા ॥ ૩૦૪॥

સમા સામ્યવિહીના ચ સીમન્તોત્સવકારિણી ।
સૃમરા સોમભાવા ચ સોમવર્ત્મપ્રસારિણી ॥ ૩૦૫॥

સમ્પન્ના ચ તથા સમ્પત્ સમ્પદ્દાત્રી તથૈવ ચ ।
સંવૃતા ચ તથા સમ્ભાષણકૌશલકારિણી ॥ ૩૦૬॥

શુમ્ભનિશુમ્ભહન્ત્રી ચ સમ્પન્ના સાયતિસ્તથા ।
સરઃસ્થા સારસી ચૈવ સુરસા સુરસાધિતા ॥ ૩૦૭॥

સૌરસ્યદાયિની ચૈવ સનયા સાનયા તથા ।
સુનીલા સ્વચ્છબુદ્ધિશ્ચ તથા સ્વાચ્છન્દ્યકારિણી ॥ ૩૦૮॥

રચનામૃતવર્ષિણી ચ સ્વિન્ના સ્વપ્નાવતી તથા ।
સ્વયમ્ભૂપૂજિતા ચૈવ સ્વયમ્ભૂઃ સ્વાત્મદીપની ॥ ૩૦૯॥

સ્વરસપ્તકસઙ્ગીતરઙ્ગિણી સ્વાત્મભાવિની ।
સ્વાહા સ્વધા સ્વાક્ષરા ચ તથાપિ સ્વામિવલ્લભા ॥ ૩૧૦॥

સક્ષતા સાક્ષિણી ચૈવ સુક્ષોદા સૂક્ષિતા તથા ।
હુઙ્કારિણી તથા હૂટ્ટવાસિની હઠકારિણી ॥ ૩૧૧॥

હતિહન્ત્રી હુતપ્રીતા હુતાસુરમહાહના ।
હૂતપાપા હેતિહસ્તા હોતૃરૂપા તથૈવ ચ ॥ ૩૧૨॥

હૌતાસનપ્રભાકર્ત્રી હૃદમ્બુજનિવાસિની ।
હનનારિપ્ટહૃદયા હીનદોષા તથૈવ ચ ॥ ૩૧૩॥

હમ્ભારવાકાલનોત્થા હૃદયાનન્દશાલિની ।

હયવાહનસુપ્રીતા હાયનજ્ઞાનદાયિની ॥ ૩૧૪॥

હૂયમાના હરિપ્રીતા હારિણી હીરકોજ્જ્વલા ।
હલિદર્શનક્રીમ્ભારા હલાહલનિપાયિની ॥ ૩૧૫॥

હિલિહિલીતિકર્ત્રી ચ તથા હુલહુલિપ્રિયા ।
હેલાકરી હ્વવાલન્તી ચ હ્વાલયન્તી તથૈવ ચ ॥ ૩૧૬॥

હેષારવસમોદા સા હસન્તી હાસવિહ્વલા ।
હાહા હાહાકરી ચૈવ હૂહૂ ગન્ધર્વવેષ્ટિતા ॥ ૩૧૭॥

હૈહયાર્ચિતતજાશ્ચ ક્ષતિકર્ત્રી ક્ષિતિસ્થિતા ।
ક્ષુતકર્ત્રી ક્ષેત્રરૂપા ક્ષેત્રપાલનિષવિતા ॥ ૩૧૮॥

ક્ષૌતદોષપ્રશમની ક્ષુદ્રા ચ ક્ષોદિના તથા ।
ક્ષૌદ્રકપ્રીતહૃદયા ક્ષિપન્તી ક્ષોભવર્જિતા ॥ ૩૧૯॥

ક્ષમાવતી તથા ક્ષામાક્ષરોલ્લાપવિલાસિની ।
ક્ષેમઙ્કુરી ક્ષૌમવસ્ત્રા તથા ક્ષયવિવર્જિતા ॥ ૩કે ૦॥

ક્ષરહીના ભક્તજના ક્ષારહીના તથૈવ ચ ।
ક્ષારપ્રીતાક્ષરપ્રાપ્યા ક્ષાલની ક્ષાલનપ્રિયા ॥ ૩૨૧॥

અઘમર્દન્યઙ્કુજા ચ અઙ્ગપ્રત્યઙ્ગકોમલા ।
અચ્છીકરણદક્ષા ચ અજમાયા તથૈવ ચ ॥ ૩૨૨॥

અઞ્ચલીચઞ્ચલા ચૈવ અઞ્જનારઞ્જની તથા ।
અટવીરટનપ્રીતા અતલાધઃસ્થિતા તથા ॥ ૩૨૩॥

અવની અમરારાતિકોટિકોટિનિપાતિની ।
અયસ્થિતા અરાલભ્રુરશક્તાડશકલા તથા ॥ ૩૨૪॥

અશયા અશરા ચૈવ અશલાકાશકોજ્જ્વલા ।
અસ્વપ્ના અસહા ચૈવ અહન્ત્રી અક્ષવૃત્તિગા ॥ ૩૨૫॥

આકાશવાસિની ચૈવ આગતાપિ તથૈવ ચ ।
આધારસુસ્થિતા ચૈવ અચલાદલકાહ્વલા ॥ ૩૨૬॥

આચારરચિતાચાર્યા આજિમધ્યપ્રવેશિની ।
આયસા આરકૂટસ્થા આલસ્યક્ષયકારિણી ॥ ૩૨૭॥

આશંસાકર્મશુભદા આષાઢધારિણી તથા ।
આશાવર્ધનકર્ત્રી ચ આશાજ્યોતિર્વિધાયિની ॥ ૩૨૮॥

આષાઢમાસિ પૂજ્યા ચ આશંસાસ્વાન્તમાસ્થિતા ।
આસારસુખિતા ચૈવ આહોસ્વિદિતિ તર્કિતા ॥ ૩૨૯॥

ઇડા ઇડતાપત્રયા ઈષદ્ધાસ્યમિલન્મુખી ।
ઉડ્ડિયાનપીઠગતા ઉષ્ટ્રપુઙ્ગવવાહિની ॥ ૩૩૦॥

ઉક્તા ઉતથ્યાધ્વજધૃક્ ઉદ્ધવપ્રીતિકારિણી ।
ઉમ્ભિતા ઉદિતા ચૈવ ઉન્નતા ઉપરિસ્થિતા ॥ ૩૩૧॥

ઇક્ષુહસ્તા તથાઽપ્યૂઢા ઋતુકાલસુખપ્રદા ।
ઋતપ્રિયા તથા ચૈવ ઋક્ષમોક્ષણકારિણી ॥ ૩૩૨॥

ઋષિભિઃ સેવિતા ચૈવ ઋષ્યશૃઙ્ગસમર્ચિતા ।
ઓડ્રપુષ્પપૂજિતા ચ આધારચક્રવાસિની ॥ ૩૩૩॥

મણિપુરવાસિની ચ સ્વાધિષ્ઠાનનિવાસિની ।
અનાહતાનાહતા ચ વિશુદ્ધચક્રવાસિની ।
આજ્ઞાચક્રવાસિની ચ સહસ્રદલવાસિની ॥ ૩૩૪॥

ઇતીમાં નામ્નામષ્ટાદશશતીં યઃ પઠતિ શૃણોતિ પાઠયતિ શ્રાવયતિ
વા સ સર્વપાપવિમુક્તઃ, સ ધની ધનદ ઇવ, સ કવિઃ કવિરિવ,
સ પણ્ડિતો ગુરુરિવ, સ રૂપવાન્ જગન્મોહનો મન્મથ ઇવ,
સ રાજ્યાધિકારી સુરરાજ ઇવ, સ તેજસ્વી વહ્નિરિવ,
સ શાસકઃ પિતૃપતિરિવ, સ સર્વતોગતિઃ પવમાન ઇવ,
સ શૌર્યયુક્તઃ સૂર્ય ઇવ, સ શીતલઃ શીતમરીચિરિવ ભવેત્ ॥ ૩૩૫॥

યઃ પઠેત્ પ્રયતો વિદ્વાન્ પદ્યાર્ધં પદ્યમેવ વા ।
બ્રહ્મહત્યાદિપાપેભ્યો મુક્ત એવ ન સશયઃ ॥ ૩૩૬॥

ઇમં સ્તવં પઠન્ વ્યાસઃ કવીન્દ્રત્વમુપાગતઃ ।
વાલ્મીકિરપિ વિપ્રત્વં વિશ્વામિત્રો જગામ સઃ ॥ ૩૩૭॥

યદ્યપિ કુષ્ઠી કુનખી બધિરોઽન્ધઃ પુનરતિ દુર્ગતો
નાનાદુરવસ્થાજડીકૃતકલેવરો જપતિ જાપયતિ વા સોઽપિ પાપં સર્વં

સન્દહ્ય પ્રેમલક્ષણાં ભક્તિમધિષ્ઠાય સર્વોપરિ ભ્રાજતે ॥ ૩૩૮॥

સર્વાબાધાપ્રશમનં ધનધાન્યવિવર્ધનમ્ ।
એતસ્યાધ્યયનેનૈવ સત્યં સત્યં વદામ્યહમ્ ॥ ૩૩૯॥

ધર્મલિપ્સુર્લભેદ્ધર્મમર્થેપ્સ્વર્થમવાપ્નુયાત્ ।
કામં કામી લભેદાશુ મુમુક્ષુર્મોક્ષમાપ્નુયાત્ ॥ ૩૪૦॥

સઙ્કટે સમનુપ્રાપ્તે ઇદં સ્વસ્ત્યયનં પરમ્ ।
રણે વા રાજસદને દ્યૂતે ચ વિજયપ્રદમ્ ॥ ૩૪૧॥

યસ્તુ નિત્યં સમાહિતઃ સમ્યગાલપતિ પુનરાલાપયતિ
શૃણુતે શ્રાવયતિ વા
તદ્દર્શનમાત્રેણ વાદિનો નિષ્પ્રભા ભવન્તિ
દૂરાદેવ તેજઃપુઞ્જપ્રતિહતચક્ષુષો
યોગિની-ડાકિની-યક્ષ-રક્ષ-કૂષ્માણ્ડ-
ભૂત-પ્રેત-પિશાચ-હિંસ્રજન્તવઃ પલાયન્તે ॥ ૩૪૨॥

તસ્ય વને વા ગહને પોતે વાતાદ્ઘૂર્ણિતે વા ન કિઞ્ચિદ્ભયમ્ ।
ન વિદ્યુતો ભયં ન ચ દસ્યુતો ભયં
ન રાજતો ભયં નાઽનલતો ભયં ન કેભ્યોઽપિ ભયમ્ ॥ ૩૪૩॥

સ સર્વધર્મસમ્પૂર્ણો નિત્યાનન્દમયસ્તથા ।
ઇહ લોકે સુખં ભુક્ત્વા પરત્ર મયિ લીયતે ॥ ૩૪૪॥

નાપમૃત્યુર્ન ચ જ્વરો નાઽશુભા બુદ્ધિરુન્મદા ।
ન માત્સર્યં ન લોભશ્ચ તસ્ય પુંસોઽપિ દુર્મતેઃ ॥ ૩૪૫॥

ઇમા સ્તુતિં પઠતિ યઃ પરાં પુમાન્
ભવેત્ સ હિઽપ્રથિતકીર્તિરુત્તમઃ ।
વિધૂયઽતત્સકલકલ્મષં વ્રજેદ્-
વ્રજેશ્વરી ચરણપદ્મભૃઙ્ગતામ્ ॥ ૩૪૬॥

॥ ઇતિ શ્રીકૃષ્ણયામલે મહાતન્ત્રે
શ્રીમદ્રાધાદેવ્યા નામ્નામષ્ટાદશશતી સમાપ્તા ॥

ચતુર્વિંશોઽધ્યાયઃ ॥ ૨૪॥

Proofread by PSA Easwaran psaeaswaran at gmail

.. 1800 names of Radha ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*